# वस्तुनिष्ठप्रश्नाः
## शास्त्री-I,II



(1) कदा भवति रजस्वला स्त्री स्वकीये?
उत्तरम्- तृतीये दिने।
(2) केन दारुणा निर्मितं नृपासनं शुभं भवति?
उत्तरम्- काश्मरीवृक्षस्य।
(3) के वृक्षाः त्याज्याः?
उत्तरम्- कण्टकिनः।
(4) कति कर्माङ्गुलतुल्या शय्या नृपस्य शुभा?
उत्तरम्- शतंकर्माङ्गुलप्रमिता।
(5) सामान्येन कियन्ति रत्नानि भवन्ति?
उत्तरम्- एकविंशतिः।
(6) कुतः सञ्जातानि रत्नानि?
उत्तरम्- 'बल' नामकादानवात्।
(7) कतिविधाः वज्रमणयः?
उत्तरम्- सप्तविधाः।
(8) विशुद्धं हीरकं कुत्र लभ्यते?
उत्तरम्- वेणानदीतटे।
(9) कृष्णवर्णं हीरकं कुत्र मिलति?
उत्तरम्- सूरपारकदेशे।
(10) शिरीषपुष्पतुल्यं हीरकं कुत्र प्राप्यते?
उत्तरम्- कोशलदेशे।
(11) पीतं हीरकं कुत्र लभ्यते?
उत्तरम्- कलिङ्गदेशे।
(12) पौण्ड्रदेशे किंवर्णकं हीरकं जायते?
उत्तरम्- श्यामवर्णकम्।
(13) कलिङ्गदेशे किंवर्णकं हीरकं लभ्यते?
उत्तरम्- पीतवर्णकम्।
(14) विंशतितण्डुलपरिमितस्य हीरकस्य कियन्मूल्यं भवति?
उत्तरम्- द्विलक्षपरिमितम्।

राजयोगस्य फलप्राप्तिकालमाह —

आरम्भो राजयोगस्य भवेन्मारक भुक्तिषु।
प्रथयन्ति तमारभ्य क्रमशः पापभुक्तयः॥

अन्वयः— यदि मारकभुक्तिषु राजयोगस्य आरम्भः भवेत्, तदा पापभुक्तयः तम् आरभ्य क्रमशः प्रथयन्ति।

संस्कृत— मारकभुक्तिषु मारकग्रहान्तर्दशासु राजयोगस्य आरम्भः समारम्भः यदि भवेत्तदा पापभुक्तयः पापग्रहान्तर्दशाः तं राजयोगम् आरभ्य क्रमशः, प्रथयन्ति विस्तारयन्ति। तत्राशयो विद्यते यत् मारकग्रहः स्वदशायां मृत्युतुल्यं कष्टमेव दिशेत्। द्रव्यादि-धनधान्यादिकेरभावः मारकग्रहेषु भवति। यद्यपि मारकग्रहभुक्तिषु सम्बन्धत्वे सति शुभफलदातृत्वं प्रतीयते, तदा अपि द्रव्यलाभन् न सम्भवति, तत्काले तदन्तर्दशायां प्रतिष्ठायशावृद्धिरेव केवलं सम्भवति। तत्र मारकेशेतरग्रहाणाम् (अशुभग्रहाणामपि) अन्तर्दशासु द्रव्यादीणं लाभमवश्यमेव भवति। अतः तात्पर्यमिदमस्ति यत् योगकारकग्रहाणां सम्बन्धीमारकपापशुभग्रहाणामन्तर्दशासु कस्मिश्चित्काले योगफल-प्राप्तिसम्भावना विद्यते, परञ्च योगफलस्य गतिरथवा शुभत्वे सामञ्जस्य सम्बन्धानुकूलेनैव कर्तव्यम्। यथायोगकारकदशायां सम्बन्धीमारकग्रहान्तर्दशायां राजयोगस्य लक्षणं स्फुटं भवति, तत्पश्चात् पापान्तर्दशायां राजयोग फलमपि सम्प्राप्तं, तत्र यदा शुभान्तर्दशा सम्फुटं तदा जातकस्य यशप्रतिष्ठावित्तादिसमृद्धिं विशेषतया सम्भवितुमर्हतीत्यभिमतलोके स्पष्टयति।

क्षेमङ्करी— योगकारक की महादशा हो उसमें उसके सम्बन्धी मारकग्रह की अन्तर्दशा हो, तो उसमें भी राजयोग का आरम्भ हो सकता है। तथा उस सम्बन्धी मारक की अन्तर्दशा से अधिक राजयोग सम्बन्धी पाप की अन्तर्दशा में उससे भी अधिक राज-योग सम्बन्धी शुभ की अन्तर्दशा में होता है।

विमर्श— योगकारी ग्रह की महादशा में सम्बन्धी मारक की अन्तर्दशा में राजयोग का आरम्भ होने की पूरी

P.T.O

सम्भावना होती है। इस क्रम में तब पापान्तर्दशा
के आने पर राजयोग में बाधा हो जाता है, तत्पश्चात्
सम्बन्धी शुभ ग्रह की अन्तर्दशा आने से उसमें
यथेष्ट वृद्धि होती है। तात्पर्य यह कि योगकारक
ग्रह के सम्बन्धी मारक, पाप और शुभग्रह की
अन्तर्दशा में कभी भी योगफल का मिलना प्रारम्भ
हो सकता है। लेकिन योगफल की तीव्रता या न्यूनता
में सामञ्जस्य सम्बन्ध के अनुसार ही कहना चाहिए
। जैसे किसी योगकारक की दशा में सम्बन्धी मारक के
आते राजयोग प्राप्त होने के लक्षण प्रकट होने लगेंगे,
जैसे पापग्रह अन्तर्दशा में आया उसकी प्राप्ति भी
हो गई, फिर जैसे ही शुभान्तर्दशा आयी कि यश
प्रतिष्ठा, धन, समृद्धि के द्वार खुलने की सम्भावना
उपलब्ध होने लगती है।

डॉ० सुरेश्वर कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ० सं० महावि० सुखसेना,
पूर्णियाँ।

Date 29.08.20
Page 4

(15) कति पणस्य कार्षापणः भवति?
उत्तरम् - विंशतिपणस्य।
(16) शुक्लहीरकस्य का परिभाषा?
उत्तरम् - इन्द्रधनुषसमानवर्णः।
(17) हीरकं का न धारयेत्?
उत्तरम् - पुत्रकामिनी वनिता।
(18) 'सुतार्थिनीभिर्नयामेर्न धार्यं वज्रसंज्ञकम्' इति कस्य वचनम्
उत्तरम् - समुद्रस्य।
(19) मुक्तोत्पत्तिस्थानानि कियन्ति?
उत्तरम् - अष्टौ।
(20) सर्वोत्तमा मुक्ता कुतः समुत्पद्यते?
उत्तरम् - शुक्तितः।
(21) मुक्तायाः कियन्ति आकरस्थानानि?
उत्तरम् - अष्टौ।
(22) धवलवर्णा मुक्ता कस्मिन् देशे भवति?
उत्तरम् - सिंहलदेशे।
(23) श्यामलवर्णिकायाः मुक्तायाः देवता भवति -
उत्तरम् - विष्णुः
(24) नवनीतनिभाः मुक्ताः कुत्र भवन्ति?
उत्तरम् - सौराष्ट्रे।
(25) रक्तवर्णिकाः मुक्ताः कुत्र भवन्ति?
उत्तरम् - ताम्रपर्ण्यां।

डॉ० सुदिष्ट कुमार
सहा० प्राचार्य (ज्योतिष)
रा० उ० सं० महावि० सुरसेना,
पूर्णियाँ।